# Shri Sudarshana Sahasranamastotram 2

# શ્રીસુદર્શનસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Sudarshana SahasranAma stotram duplicate

File name : sudarshanasahasranAmastotram.itx

Category : sahasranAma, vishhnu

Location : doc_vishhnu

Transliterated by : From http://muktalib5.org with permission, DPD

Proofread by : DPD

Description/comments : ahirbudhnyasaMhitAyAM tantrarahasye

Acknowledge-Permission: Marjorie Woollacott, Digital Library Coordinator muktabodha.org

Latest update : November 2, 2014, July 17, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2023

*sanskritdocuments.org*

# શ્રીસુદર્શનસહસ્રનામસ્તોત્રમ્ ૨

(અહિર્બુધ્ન્યસંહિતાપરિશિષ્ટતઃ)
પ્રણમ્ય શિરસા દેવં નારાયણમશેષગમ્ ।
રમાવક્ષોજકસ્તૂરીપઙ્કમુદ્રિતવક્ષસમ્ ॥ ૧॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ પારાશર્યસ્તપોધનઃ ।
હિતાય સર્વજગતાં નારદં મુનિમબ્રવીત્ ॥ ૨॥

જ્ઞાનવિદ્યાવિશેષજ્ઞં કર્પૂરધવલાકૃતિમ્ ।
વીણાવાદનસન્તુષ્ટમાનસં મરુતાં પરમ્ ॥ ૩॥

હિરણ્યગર્ભસમ્ભૂતં હિરણ્યાક્ષાદિસેવિતમ્ ।
પુણ્યરાશિં પુરાણજ્ઞં પાવનીકૃતદિક્તટમ્ ॥ ૪॥

વ્યાસ ઉવાચ -
દેવર્ષે નારદ શ્રીમન્ સાક્ષાદ્ બ્રહ્માઙ્ગસમ્ભવ ।
ભવાનશેષવિદ્યાનાં પારગસ્તપસાં નિધિઃ ॥ ૫॥

વેદાન્તપારગઃ સર્વશાસ્ત્રાર્થપ્રતિભોજ્જ્વલઃ ।
પરબ્રહ્મણિ નિષ્ણાતઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૬॥

જગદ્ધિતાય જનિતઃ સાક્ષાદેવ ચતુર્મુખાત્ ।
હન્યન્તે ભવતા દૈત્યા દૈત્યારિભુજવિક્રમૈઃ ॥ ૭॥

કાલોઽનુગ્રહકર્તા ત્વં ત્રૈલોક્યં ત્વદ્વશેઽનઘ ।
મનુષ્યા ઋષયો દેવાસ્ત્વયા જીવન્તિ સત્તમ ॥ ૮॥

કર્તૃત્વે લોકકાર્યાણાં વરત્વે પરિનિષ્ઠિત ।
પૃચ્છામિ ત્વામશેષજ્ઞં નિદાનં સર્વસમ્પદામ્ ॥ ૯॥

સર્વસંસારનિર્મુક્તં ચિદ્ઘનં શાન્તમાનસમ્ ।
યઃ સર્વલોકહિતકૃદ્યં પ્રશંસન્તિ યોગિનઃ ॥ ૧૦॥

ઇદં ચરાચરં વિશ્વં ધૃતં યેન મહામુને ।
સ્પૃહયન્તિ ચ યત્પ્રીત્યા યસ્મૈ બ્રહ્માદિદેવતાઃ ॥ ૧૧॥

નિર્માણસ્થિતિસંહારા યતો વિશ્વસ્ય સત્તમ ।
યસ્ય પ્રસાદાદ્ બ્રહ્માદ્યા લભન્તે વાઞ્છિતં ફલમ્ ॥ ૧૨॥

દારિદ્ર્યનાશો જાયેત યસ્મિન્ શ્રુતિપથં ગતે ।
વિવક્ષિતાર્થનિર્વાહા મુખાન્નિઃસરતીહ ગીઃ ॥ ૧૩॥

નૃપાણાં રાજ્યહીનાનાં યેન રાજ્યં ભવિષ્યતિ ।
અપુત્રઃ પુત્રવાન્ યેન વન્ધ્યા પુત્રવતી ભવેત્ ॥ ૧૪॥

શત્રૂણામચિરાન્નાશો જ્ઞાનં જ્ઞાનૈષિણામપિ ।
ચાતુર્વર્ગ્યફલં યસ્ય ક્ષણાદ્ ભવતિ સુવ્રત ॥ ૧૫॥

ભૂતપ્રેતપિશાચાદ્યા યક્ષરાક્ષસપન્નગાઃ ।
ભૂતજ્વરાદિરોગાશ્ચ યસ્ય સ્મરણમાત્રતઃ ॥ ૧૬॥

મુચ્યન્તે મુનિશાર્દૂલ યેનાખિલજગદ્ધૃતમ્ ।
તદેતદિતિ નિશ્ચિત્ય સર્વશાસ્ત્રવિશારદ ॥ ૧૭॥

સર્વલોકહિતાર્થાય બ્રૂહિ મે સકલં ગુરો ।
ઇત્યુક્તસ્તેન મુનિના વ્યાસેનામિતતેજસા ॥ ૧૮॥

બદ્ધાઞ્જલિપુટો ભૂત્વા સાદરં નારદો મુનિઃ ।
નમસ્કૃત્ય જગન્મૂલં લક્ષ્મીકાન્તં પરાત્ પરમ્ ॥ ૧૯॥

ઉવાચ પરમપ્રીતઃ કરુણામૃતધારયા ।
આપ્યાયયન્ મુનીન્ સર્વાન્ વ્યાસાદીન્ બ્રહ્મતત્પરાન્ ॥ ૨૦॥

નારદઃ ઉવાચ -
બહિરન્તસ્તમશ્છેદિ જ્યોતિર્વન્દે સુદર્શનમ્ ।
યેનાવ્યાહતસઙ્કલ્પં વસ્તુ લક્ષ્મીધરં વિદુઃ ॥ ૨૧॥

ૐ અસ્ય શ્રીસુદર્શનસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય અહિર્બુધ્ન્યો
ભગવાનૃષિઃ, અનુષ્ટુપ્ છન્દઃ, શ્રીસુદર્શનમહાવિષ્ણુર્દેવતા,
રં બીજમ્, હું શક્તિઃ, ફટ્ કીલકમ્, રાં રીં રૂં રૈં રૌં રઃ ઇતિ મન્ત્રઃ,
શ્રીસુદર્શનપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ રાં અઙ્ગુષ્ઠાભ્યાં નમઃ,

ॐ રીં તર્જનીભ્યાં નમઃ,
ॐ રૂં મધ્યમાભ્યાં નમઃ,
ॐ રૈં અનામિકાભ્યાં નમઃ,
ॐ રૌં કનિષ્ઠિકાભ્યાં,
ॐ રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

એવં હૃદયાદિન્યાસઃ
ॐ રાં જ્ઞાનાય હૃદયાય નમઃ,
ॐ રીં ઐશ્વર્યાય શિરસે સ્વાહા,
ॐ રૂં શક્ત્યૈ શિખાયૈ વષટ્,
ॐ રૈં બલાય કવચાય હું,
ॐ રૌં વીર્યાયાસ્ત્રાય ફટ્,
ॐ રઃ તેજસે નેત્રાભ્યાં વૌષટ્ ॥

અથ દિગ્બન્ધઃ
ॐ ઠં ઠં પૂર્વાં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં આગ્નેયીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં યામ્યાં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં નૈરૃતીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં વારુણીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં વાયવીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં કૌબેરીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં ઐશાનીં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં ઊર્ધ્વાં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં અધરાં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા,
ॐ ઠં ઠં સર્વાં દિશં ચક્રેણ બધ્નામિ નમશ્ચક્રાય હું ફટ્ સ્વાહા ।
ઇતિ દિગ્બન્ધઃ ।
॥ ધ્યાનમ્ ॥

કલ્પાન્તાર્કપ્રકાશં ત્રિભુવનમખિલં તેજસા પૂરયન્તં
રક્તાક્ષં પિઙ્ગકેશં રિપુકુલભયદં ભીમદંષ્ટ્રાટ્ટહાસમ્ ।
શઙ્ખં ચક્રં ગદાબ્જં પૃથુતરમુસલં ચાપપાશાઙ્કુશાદીન્
બિભ્રાણં દોર્ભિરાદ્યં મનસિ મુરરિપોર્ભાવયે ચક્રરાજમ્ ॥

શઙ્ખં ચક્રં ગદાબ્જં શરમસિમિષુધિં ચાપપાશાઙ્કુશાદીન્
બિભ્રાણં વજ્રખેટં હલમુસલલસત્કુન્તમત્યુગ્રદંષ્ટ્રમ્ ।
જ્વાલાકેશં ત્રિનેત્રં જ્વલદનલનિભં હારકેયૂરભૂષં
ધ્યાયેત્ ષટ્કોણસંસ્થં સકલરિપુજનપ્રાણસંહારચક્રમ્ ॥

કકારાદીનિ ષોડશ નામાનિ
કલ્યાણગુણસમ્પન્નઃ કલ્યાણવસનોજ્જ્વલઃ ।
કલ્યાણાચલગમ્ભીરઃ કલ્યાણજનરઞ્જકઃ ॥ ૧॥

કલ્યાણદોષનાશશ્ચ કલ્યાણરુચિરાઙ્ગકઃ ।
કલ્યાણાઙ્ગદસમ્પન્નઃ કલ્યાણાકારસન્નિભઃ ॥ ૨॥

કરાલવદનોઽત્રાસી કરાલાઙ્ગોઽભયઙ્કરઃ ।
કરાલતનુજોદ્દામઃ કરાલતનુભેદકઃ ॥ ૩॥

કરઞ્જવનમધ્યસ્થઃ કરઞ્જદધિભોજનઃ ।
કરઞ્જાસુરસંહર્તા કરઞ્જમધુરાઙ્ગકઃ ॥ ૪॥

ખકારાદીનિ દશ
ખઞ્જનાનન્દજનકઃ ખઞ્જનાહારજૂષિતઃ ।
ખઞ્જનાયુધભૃદ્ દિવ્યખઞ્જનાખણ્ડગર્વહૃત્ ॥ ૫॥

ખરાન્તકઃ ખરરુચિઃ ખરદુઃખૈરસેવિતઃ ।
ખરાન્તકઃ ખરોદારઃ ખરાસુરવિભઞ્જનઃ ॥ ૬॥

ગકારાદીનિ દ્વાદશ
ગોપાલો ગોપતિર્ગોપ્તા ગોપસ્ત્રીનાથરઞ્જકઃ ।
ગોજારુણતનુર્ગોજો ગોજારતિકૃતોત્સવઃ ॥ ૭॥

ગમ્ભીરનાભિર્ગમ્ભીરો ગમ્ભીરાર્થસમન્વિતઃ ।
ગમ્ભીરવૈદ્યમરુતો ગમ્ભીરગુણભૂષિતઃ ॥ ૮॥

ઘકારાદીન્યેકાદશ
ઘનરાવો ઘનરુચિર્ઘનગમ્ભીરનિસ્વનઃ ।
ઘનાઘનૌઘનાશી ચ ઘનસન્તાનદાયકઃ ॥ ૯॥

ઘનરોચિર્ઘનચરો ઘનચન્દનચર્ચિતઃ ।
ઘનહેતિર્ઘનભુજો ઘનોઽખિલસુરાર્ચિતઃ ॥ ૧૦॥

ડકારાદીનિ ચત્વારિ
ડકારાવધિવિભવો ડકારો મુનિસમ્મતઃ ।
ડકારવીતસહિતો ડકારાકારભૂષિતઃ ॥ ૧૧॥

ચકારાદીનિ ષટ્પઞ્ચાશત્
ચક્રરાજશ્ચક્રપતિશ્ચક્રાધીશઃ સુચક્રભૂઃ ।
ચક્રસેવ્યશ્ચક્રધરશ્ચક્રભૂષણભૂષિતઃ ॥ ૧૨॥

ચક્રરાજરુચિશ્ચક્રશ્ચક્રપાલનતત્પરઃ ।
ચક્રધૃચ્ચક્રવરદશ્ચક્રભૂષણભૂષિતઃ ॥ ૧૩॥

સુચક્રધીઃ સુચક્રાખ્યઃ સુચક્રગુણભુષિતઃ ।
વિચક્રશ્ચક્રનિરતશ્ચક્રસમ્પન્નવૈભવઃ ॥ ૧૪॥

ચક્રદોશ્ચક્રદશ્ચક્રશ્ચક્રરાજપરાક્રમઃ ।
ચક્રનાદશ્ચક્રચરશ્ચક્રગશ્ચક્રપાશકૃત્ ॥ ૧૫॥

ચક્રવ્યાપી ચક્રગુરુશ્ચક્રહારી વિચક્રભૃત્ ।
ચક્રાઙ્ગશ્ચક્રમહિતશ્ચક્રવાકગુણાકરઃ ॥ ૧૬॥

આચક્રશ્ચક્રધર્મજ્ઞશ્ચક્રકશ્ચક્રમર્દનઃ ।
આચક્રનિયમશ્ચક્રઃ સર્વપાપવિધૂનનઃ ॥ ૧૭॥

ચક્રજ્વાલશ્ચક્રધરશ્ચક્રપાલિતવિગ્રહઃ ।
ચક્રવર્તી ચક્રદાયી ચક્રકારી મદાપહઃ ॥ ૧૮॥

ચક્રકોટિમહાનાદશ્ચક્રકોટિસમપ્રભઃ ।
ચક્રરાજાવનચરશ્ચક્રરાજાન્તરોજ્જ્વલઃ ॥ ૧૯॥

ચઞ્ચલારાતિદમનશ્ચઞ્ચલસ્વાન્તરોમકૃત્ ।
ચઞ્ચલો માનસોલ્લાસી ચઞ્ચલાચલભાસુરઃ ॥ ૨૦॥

ચઞ્ચલારાતિનિરતશ્ચઞ્ચલાધિકચઞ્ચલઃ ।
છકારાદીનિ નવ
છાયયાખિલતાપઘ્નશ્છાયામદવિભઞ્જનઃ ॥ ૨૧॥

છાયાપ્રિયોઽધિકરુચિશ્છાયાવૃક્ષસમાશ્રયઃ ।
છાયાન્વિતશ્છાયયાર્ચ્યશ્છાયાધિકસુખપ્રદઃ ॥ ૨૨॥

છાયામ્બરપરીધાનશ્છાયાત્મજનમુઞ્ચિતઃ ।

જકારાદીનિ ષોડશ
જલજાક્ષીપ્રિયકરો જલજાનન્દદાયકઃ ॥ ૨૩॥

જલજાસિદ્ધિરુચિરો જલજાલસમો ભરઃ ।
જલજાલાપસંસ્તુત્યો જલજાતાય મોદકૃત્ ॥ ૨૪॥

જલજાહારચતુરો જલજારાધનોત્સુકઃ ।
જનકસ્તુતિસન્તુષ્ટો જનકારાધિતાધિકઃ ॥ ૨૫॥

જનકામોદનપરો જનકાનન્દદાયકઃ ।
જનકાધ્યાનસન્તુષ્ટહૃદયો જનકાર્ચિતઃ ॥ ૨૬॥

જનકાનન્દજનનો જનકૃધ્દૃદયામ્બુજઃ ।
ઝકારાદીનિ ચત્વારિ
ઝઞ્ઝામારુતવેગાઢ્યો ઝઞ્ઝામારુતસઙ્ગરઃ ॥ ૨૭॥

ઝઞ્ઝામારુતસંરાવો ઝઞ્ઝામારુતવિક્રમઃ ।
ઞકારાદિની દ્વે
ઞકારામ્બુજમધ્યસ્થો ઞકારકૃતસન્નિધિઃ ॥ ૨૮॥

ટકારાદીનિ નવ
ટઙ્કધારી ટઙ્કવપુષ્ટઙ્કસંહારકારકઃ ।
ટઙ્કચ્છિન્નસુવર્ણાભષ્ટઙ્કારધનુરુજ્જ્વલઃ ॥ ૨૯॥

ટઙ્કારાગ્નિસમાકારષ્ટઙ્કારરવમેદુરઃ ।
ટઙ્કારકીર્તિભરિતષ્ટઙ્કારાનન્દવર્ધનઃ ॥ ૩૦॥

ડકારાદીન્યેકોનવિંશતિઃ
ડમ્ભસંહતિસંહર્તા ડમ્ભસન્તતિવર્ધનઃ ।
ડમ્ભધૃગ્ ડમ્ભહૃદયો ડમ્ભદણ્ડનતત્પરઃ ॥ ૩૧॥

ડિમ્ભધૃગ્ ડિમ્ભકૃડ્ડિમ્ભો ડિમ્ભસૂદનતત્પરઃ ।
ડિમ્ભપાપહરો ડિમ્ભસમ્ભાવિતપદામ્બુજઃ ॥ ૩૨॥

ડિમ્ભરોદ્યત્કટમ્બાજો ડમરુધ્યાનતત્પરઃ ।
ડમરૂદ્ભવસંહર્તા ડમરૂદ્ભવનન્દનઃ ॥ ૩૩॥

ડાડિમીવનમધ્યસ્થો ડાડિમીકુસુમપ્રિયઃ ।
ડાડિમીફલસન્તુષ્ટો ડાડિમીફલવર્જિતઃ ॥ ૩૪॥

ઢકારાદીન્યષ્ટૌ
ઢક્કામનોહરવપુર્ઢક્કારવવિરાજિતઃ ।
ઢક્કાવાદ્યેષુ નિરતો ઢક્કાધારણતત્પરઃ ॥ ૩૫॥

ઢકારબીજસમ્પન્નો ઢકારાક્ષરમેદુરઃ ।
ઢકારમધ્યસદનો ઢકારવિહિતાન્ત્રકઃ ॥ ૩૬॥

ણકારાદીનિ ચત્વારિ
ણકારબીજવસતિર્ણકારવસનોજ્જ્વલઃ ।
ણકારાતિગભીરાઙ્ગો ણકારારાધનપ્રિયઃ ॥ ૩૭॥

તકારાદીનિ ચતુર્દશ
તરલાક્ષીમહાહર્તા તારકાસુરહૃત્તરિઃ ।
તરલોજ્જ્વલહારાઢ્યસ્તરલસ્વાન્તરઞ્જકઃ ॥ ૩૮॥

તારકાસુરસંસેવ્યસ્તારકાસુરમાનિતઃ ।
તુરઙ્ગવદનસ્તોત્રસન્તુષ્ટહૃદયામ્બુજઃ ॥ ૩૯॥

તુરઙ્ગવદનઃ શ્રીમાંસ્તુરઙ્ગવદનસ્તુતઃ ।
તમઃ પટલસઞ્છન્નસ્તમઃ સન્તતિમર્દનઃ ॥ ૪૦॥

તમોનુદો જલશયસ્તમઃસંવર્ધનો હરઃ ।
થકારાદીનિ ચત્વારિ
થવર્ણમધ્યસંવાસી થવર્ણવરભૂષિતઃ ॥ ૪૧॥

થવર્ણબીજસમ્પન્નસ્થવર્ણરુચિરાલયઃ ।
દકારાદીનિ દશ
દરભૃદ્ દરસારાક્ષો દરહૃદ્ દરવઞ્ચકઃ ॥ ૪૨॥

દરફુલ્લામ્બુજરુચિર્દરચક્રવિરાજિતઃ ।
દધિસઙ્ગ્રહણવ્યગ્રો દધિપાણ્ડરકીર્તિભૃત્ ॥ ૪૩॥

દધ્યન્નપૂજનરતો દધિવામનમોદકૃત્ ।
ધકારાદીનિ ચતુર્વિંશતિઃ
ધન્વી ધનપ્રિયો ધન્યો ધનાધિપસમઞ્ચિતઃ ॥ ૪૪॥

ધરો ધરાવનરતો ધનધાન્યસમૃદ્ધિદઃ ।
ધનઞ્જયો ધાનાધ્યક્ષો ધનદો ધનવર્જિતઃ ॥ ૪૫॥

ધનગ્રહણસમ્પન્નો ધનસમ્મતમાનસઃ ।
ધનરાજવનાસક્તો ધનરાજયશોભરઃ ॥ ૪૬॥

ધનરાજમદાહર્તા ધનરાજસમીડિતઃ ।
ધર્મકૃદ્ધર્મધૃદ્ધર્મી ધર્મનન્દનસન્નુતઃ ॥ ૪૭॥

ધર્મરાજો ધનાસક્તો ધર્મજ્ઞાકલ્પિતસ્તુતિઃ ।
નકારાદીનિ ષોડશ
નરરાજવનાયત્તો નરરાજાય નિર્ભરઃ ॥ ૪૮॥

નરરાજસ્તુતગુણો નરરાજસમુજ્જ્વલઃ ।
નવતામરસોદારો નવતામરસેક્ષણઃ ॥ ૪૯॥

નવતામરસાહારો નવતામરસારુણઃ ।
નવસૌવર્ણવસનો નવનાથદયાપરઃ ॥ ૫૦॥

નવનાથસ્તુતનદો નવનાથસમાકૃતિઃ ।
નાલિકાનેત્રમહિતો નાલિકાવલિરાજિતઃ ॥ ૫૧॥

નાલિકાગતિમધ્યસ્થો નાલિકાસનસેવિતઃ ।
પકારાદીનિન્ચષ્ટાદશ
પુણ્ડરીકાક્ષરુચિતઃ પુણ્ડરીકમદાપહઃ ॥ ૫૨॥

પુણ્ડરીકમુનિસ્તુત્યઃ પુણ્ડરીકસુહૃદ્દ્યુતિઃ ।
પુણ્ડરીકપ્રભારમ્યઃ પુણ્ડરીકનિભાનનઃ ॥ ૫૩॥

પુણ્ડરીકાક્ષસન્માનઃ પુણ્ડરીકદયાપરઃ ।
પરઃ પરાગતિવપુઃ પરાનન્દઃ પરાત્ પરઃ ॥ ૫૪॥

પરમાનન્દજનકઃ પરમાન્નાધિકપ્રિયઃ ।
પુષ્કરાક્ષકરોદારઃ પુષ્કરાક્ષઃ શિવઙ્કુરઃ ॥ ૫૫॥

પુષ્કરવ્રાતસહિતઃ પુષ્કરારવસંયુતઃ ।
અથ ફકારાદીનિ નવ
ફટ્કારતઃ સ્તૂયમાનઃ ફટ્કારાક્ષરમધ્યગઃ ॥ ૫૬॥

ફટ્કારધ્વસ્તદનુજઃ ફટ્કારાસનસઙ્ગતઃ ।
ફલહારઃ સ્તુતફલઃ ફલપૂજાકૃતોત્સવઃ ॥ ૫૭॥

ફલદાનરતોઽત્યન્તફલસમ્પૂર્ણમાનસઃ ।

બકારાદીનિ ષોડશ
બલસ્તુતિર્બલાધારો બલભદ્રપ્રિયઙ્કરઃ ॥ ૫૮॥

બલવાન્ બલહારી ચ બલયુગ્વૈરિભઞ્જનઃ ।
બલદાતા બલધરો બલરાજિતવિગ્રહઃ ॥ ૫૯॥

બલાદ્બલો બલકરો બલાસુરનિષૂદનઃ ।
બલરક્ષણનિષ્ણાતો બલસમ્મોદદાયકઃ ॥ ૬૦॥

બલસમ્પૂર્ણહૃદયો બલસંહારદીક્ષિતઃ ।
ભકારાદીનિ ચતુર્વિંશતિઃ
બહ્વસ્તુતો ભવપતિર્ભવસન્તાનદાયકઃ ॥ ૬૧॥

ભવધ્વંસી ભવહરો ભવસ્તમ્ભનતત્પરઃ ।
ભવરક્ષણનિષ્ણાતો ભવસન્તોષકારકઃ ॥ ૬૨॥

ભવસાગરસઞ્છેત્તા ભવસિન્ધુસુખપ્રદઃ ।
ભદ્રદો ભદ્રહૃદયો ભદ્રકાર્યસમાશ્રિતઃ ॥ ૬૩॥

ભદ્રશ્રીચર્ચિતતનુર્ભદ્રશ્રીદાનદીક્ષિતઃ ।
ભદ્રપાદપ્રિયો ભદ્રો હ્યભદ્રવનભઞ્જનઃ ॥ ૬૪॥

ભદ્રશ્રીગાનસરસો ભદ્રમણ્ડલમણ્ડિતઃ ।
ભરદ્વાજસ્તુતપદો ભરદ્વાજસમાશ્રિતઃ ॥ ૬૫॥

ભરદ્વાજાશ્રમરતો ભરદ્વાજદયાકરઃ ।
મકારાદીનિ ત્રિપઞ્ચાશત્
મસારનીલરુચિરો મસારચરણોજ્જ્વલઃ ॥ ૬૬॥

મસારસારસત્કાર્યો મસારાંશુકભૂષિતઃ ।
માકન્દવનસઞ્ચારી માકન્દજનરઞ્જકઃ ॥ ૬૭॥

માકન્દાનન્દમન્દારો માકન્દાનન્દબન્ધુરઃ ।
મણ્ડલો મણ્ડલાધીશો મણ્ડલાત્મા સુમણ્ડલઃ ॥ ૬૮॥

મણ્ડેશો મણ્ડલાન્તમણ્ડલાર્ચિતમણ્ડલઃ ।
મણ્ડલાવનન્ષ્ણાતો મણ્ડલાવરણી ઘનઃ ॥ ૬૯॥

મણ્ડલસ્થો મણ્ડલલાગ્રો મણ્ડલાભરણાઙ્કિતઃ ।
મધુદાનવસંહર્તા મધુમઞ્જુલવાગ્ભરઃ ॥ ૭૦॥

મધુદાનાધિકરતો મધુમઙ્ગલવૈભવઃ ।
મધુજેતા મધુકરો મધુરો મધુરાધિપઃ ॥ ૭૧॥

મધુવારણસંહર્તા મધુસન્તાનકારકઃ ।
મધુમાસાતિરુચિરો મધુમાસવિરાજિતઃ ॥ ૭૨॥

મધુપુષ્ટો મધુતનુર્મધુગો મધુસંવરઃ ।
મધુરો મધુરાકારો મધુરામ્બરભૂષિતઃ ॥ ૭૩॥

મધુરાનગરીનાથો મધુરાસુરભઞ્જનઃ ।
મધુરાહારનિરતો મધુરાહ્લાદદક્ષિણઃ ॥ ૭૪॥

મધુરામ્ભોજનયનો મધુરધિપસઙ્ગતઃ ।
મધુરાનન્દચતુરો મધુરારાતિસઙ્ગતઃ ॥ ૭૫॥

મધુરાભરણોલ્લાસી મધુરાઙ્ગદભૂષિતઃ ।
મૃગરાજવનીસક્તો મૃગમણ્ડલમણ્ડિતઃ ॥ ૭૬॥

મૃગાદરો મૃગપતિર્મૃગારાતિવિદારણઃ ।
યકારાદીનિ દશ
યજ્ઞપ્રિયો યજ્ઞવપુર્યજ્ઞસમ્પ્રીતમાનસઃ ॥ ૭૭॥

યજ્ઞસન્તાનનિરતો યજ્ઞસમ્ભારસમ્ભ્રમઃ ।
યજ્ઞયજ્ઞો યજ્ઞપદો યજ્ઞસમ્પાદનોત્સુકઃ ॥ ૭૮॥

યજ્ઞશાલાકૃતાવાસો યજ્ઞસમ્ભાવિતાન્નકઃ ।
રેફાદીનિ વિંશતિઃ
રસેન્દ્રો રસસમ્પન્નો રસ રાજો રસોત્સુકઃ ॥ ૭૯॥

રસાન્વિતો રસધરો રસચેલો રસાકરઃ ।
રસજેતા રસશ્રેષ્ઠો રસરાજાભિરઞ્જિતઃ ॥ ૮૦॥

રસતત્ત્વસમાસક્તો રસદારપરાક્રમઃ ।
રસરાજો રસધરો રસેશો રસવલ્લભઃ ॥ ૮૧॥

રસનેતા રસાવાસો રસોત્કરવિરાજિતઃ ।
લકારાદીન્યષ્ટૌ
લવઙ્ગપુષ્પસન્તુષ્ટો લવઙ્ગકુસુમોચિતઃ ॥ ૮૨॥

લવઙ્ગવનમધ્યસ્થો લવઙ્ગકુસુમોત્સુકઃ ।

લતાવલિસમાયુક્તો લતારસમર્ચિતઃ ॥ ૮૩॥

લતાભિરામતનુભૃલ્લતાતિલકભૂષિતઃ ।
વકારાદીનિ સપ્તદશ
વીરસ્તુતપદામ્ભોજો વિરાજગમનોત્સુકઃ ॥ ૮૪॥

વિરાજપત્રમધ્યસ્થો વિરાજરસસેવિતઃ ।
વરદો વરસમ્પન્નો વરસમુન્નતઃ ॥ ૮૫॥

વરસ્તુતિર્વર્ધમાનો વરધૃદ્ વરસમ્ભવઃ ।
વરદાનરતો વર્યો વરદાનસમુત્સુકઃ ॥ ૮૬॥

વરદાનાર્દ્રહૃદયો વરવારણસંયુતઃ ।
શકારાદીનિ પઞ્ચવિંશતિઃ
શારદાસ્તુતપાદાબ્જઃ શારદામ્ભોજકીર્તિભૃત્ ॥ ૮૭॥

શારદામ્ભોજનયનઃ શારદાધ્યક્ષસેવિતઃ ।
શારદાપીઠવસતિઃ શારદાધિપસન્નુતઃ ॥ ૮૮॥

શારદાવાસદમનઃ શારદાવાસભાસુરઃ ।
શતક્રતુસ્તૂયમાનઃ શતક્રતુપરાક્રમઃ ॥ ૮૯॥

શતક્રતુસમૈશ્વર્યઃ શતક્રતુમદાપહઃ ।
શરચાપધરઃ શ્રીમાન્ શરસમ્ભવવૈભવઃ ॥ ૯૦॥

શરપાણ્ડરકીર્તિશ્રીઃ શરત્સારસલોચનઃ ।
શરસઙ્ગમસમ્પન્નઃ શરમણ્ડલમણ્ડિતઃ ॥ ૯૧॥

શરાતિગઃ શરધરઃ શરલાલનલાલસઃ ।
શરોદ્ભવસમાકારઃ શરયુદ્ધવિશારદ ॥ ૯૨॥

શરવૃન્દાવનરતિઃ શરસમ્મતવિક્રમઃ ।
ષકારાદીનિ ષોડશ
ષટ્પદઃ ષટ્પદાકારઃ ષટ્પદાવલિસેવિતઃ ॥ ૯૩॥

ષટ્પદાકારમધુરઃ ષટ્પદી ષટ્પદોદ્ધતઃ ।
ષડઙ્ગવેદવિનુતઃ ષડઙ્ગપદમેદુરઃ ॥ ૯૪॥

ષટ્પદ્મકવિતાવાસઃ ષડ્બિન્દુરચિતદ્યુતિઃ ।
ષડ્બિન્દુમધ્યવસતિઃ ષડ્બિન્દુવિશદીકૃતઃ ॥ ૯૫॥

ષડામ્નાયસ્તૃયમાનઃ ષડામ્નાયાન્તરસ્થિતઃ ।
ષટ્છક્તિમઙ્ગલવૃતઃ ષટ્ચક્રકૃતશેખરઃ ॥ ૯૬॥

સકારાદીનિ વિંશતિઃ
સારસારસરક્તાઙ્ગઃ સારસારસલોચનઃ ।
સારદીપ્તિઃ સારતનુઃ સારસાક્ષકરપ્રિયઃ ॥ ૯૭॥

સારદીપી સારકૃપઃ સારસાવનકૃજ્જ્વલઃ ।
સારઙ્ગસારદમનઃ સારકલ્પિતકુણ્ડલઃ ॥ ૯૮॥

સારસારણ્યવસતિઃ સારસારવમેદુરઃ ।
સારગાનપ્રિયઃ સારઃ સારસારસુપણ્ડિતઃ ॥ ૯૯॥

સદ્રક્ષકઃ સદામોદી સદાનન્દનદેશિકઃ ।
સદ્વૈદ્યવન્દ્યચરણઃ સદ્વૈદ્યોજ્જ્વલમાનસઃ ॥ ૧૦૦॥

હકારાદીનિ ચતુઃષષ્ટિઃ
હરિજેતા હરિરથો હરિસેવાપરાયણઃ ।
હરિવર્ણો હરિચરો હરિગો હરિવત્સલઃ ॥ ૧૦૧॥

હરિદ્રો હરિસંસ્તોતા હરિધ્યાનપરાયણઃ ।
હરિકલ્પાન્તસંહર્તા હરિસારસમુજ્જ્વલઃ ॥ ૧૦૨॥

હરિચન્દનલિપ્તાઙ્ગો હરિમાનસસમ્મતઃ ।
હરિકારુણ્યનિરતો હંસમોચનલાલસઃ ॥ ૧૦૩॥

હરિપુત્રાભયકરો હરિપુત્રસમઞ્ચિતઃ ।
હરિધારણસાન્નિધ્યો હરિસમ્મોદદાયકઃ ॥ ૧૦૪॥

હેતિરાજો હેતિધરો હેતિનાયકસંસ્તુતઃ ।
હેતિર્હરિર્હેતિવપુર્હેતિહા હેતિવર્ધનઃ ॥ ૧૦૫॥

હેતિહન્તા હેતિયુદ્ધકરો હેતિવિભૂષણઃ ।
હેતિદાતા હેતિપરો હેતિમાર્ગપ્રવર્તકઃ ॥ ૧૦૬॥

હેતિસન્તતિસમ્પૂર્ણો હેતિમણ્ડલમણ્ડિતઃ ।
હેતિદાનપરઃ સર્વહેત્યુગ્રપરિભૂષિતઃ ॥ ૧૦૭॥

હંસરૂપી હંસગતિર્હંસસન્નુતવૈભવઃ ।
હંસમાર્ગરતો હંસરક્ષકો હંસનાયકઃ ॥ ૧૦૮॥

હંસદૃગ્ગોચરતનુર્હંસસઙ્ગીતતોષિતઃ ।
હંસજેતા હંસપતિર્હંસગો હંસવાહનઃ ॥ ૧૦૯॥

હંસજો હંસગમનો હંસરાજસુપૂજિતઃ ।
હંસવેગો હંસધરો હંસસુન્દરવિગ્રહઃ ॥ ૧૧૦॥

હંસવત્ સુન્દરતનુર્હંસસઙ્ગતમાનસઃ ।
હંસસ્વરૂપસારજ્ઞો હંસસન્નતમાનસઃ ॥ ૧૧૧॥

હંસસંસ્તુતસામર્થ્યો હરિરક્ષણતત્પરઃ ।
હંસસંસ્તુતમાહાત્મ્યો હરપુત્રપરાક્રમઃ ॥ ૧૧૨॥

ક્ષકારાદીનિ દ્વાદશ નામાનિ
ક્ષીરાર્ણવસમુદ્ભૂતઃ ક્ષીરસમ્ભવભાવિતઃ ।
ક્ષીરાબ્ધિનાથસંયુક્તઃ ક્ષીરકીર્તિવિભાસુરઃ ॥ ૧૧૩॥

ક્ષણદારવસંહર્તા ક્ષણદારવસમ્મતઃ ।
ક્ષણદાધીશસંયુક્તઃ ક્ષણદાનકૃતોત્સવઃ ॥ ૧૧૪॥

ક્ષીરાભિષેકસન્તુષ્ટ ક્ષીરપાનાભિલાષુકઃ ।
ક્ષીરાજ્યભોજનાસક્તઃ ક્ષીરસમ્ભવવર્ણકઃ ॥ ૧૧૫॥

ફલશ્રુતિઃ
ઇત્યેતત્ કથિતં દિવ્યં સર્વપાપપ્રણાશનમ્ ।
સર્વશત્રુક્ષયકરં સર્વસમ્પત્પ્રદાયકમ્ ॥ ૧૧૬॥

સર્વસૌભાગ્યજનકં સર્વમઙ્ગલકારકમ્ ।
સર્વાદારિદ્ર્યશમનં સર્વોપદ્રવનાશનમ્ ॥ ૧૧૭॥

સર્વશાન્તિકરણ્ ગુહ્યં સર્વરોગનિવારણમ્ ।
અતિબન્ધગ્રહહરં સર્વદુઃખનિવારકમ્ ॥ ૧૧૮॥

નામ્નાં સહસ્રં દિવ્યાનાં ચક્રરાજસ્ય તત્પતેઃ ।
નામાનિ હેતિરાજસ્ય યે પઠન્તીહ માનવાઃ ।
તેષાં ભવન્તિ સકલાઃ સમ્પદો નાત્ર સંશયઃ ॥ ૧૧૯॥

ઇત્યહિર્બુધ્ન્યસંહિતાયાં તન્ત્રરહસ્યે વ્યાસનારદસંવાદે
શ્રીસુદર્શનસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread at Digital Library at http://muktalib5.org

Reproofread by DPD.

*Shri Sudarshana Sahasranamastotram 2*

pdf was typeset on August 3, 2023

Please send corrections to *sanskrit@cheerful.com*